# Shri Krishnamangalam

# શ્રીકૃષ્ણમઙ્ગલમ્

## Document Information

Text title : Shri Krishnamangalam 2

File name : kRRiShNamangalam2.itx

Category : vishhnu, krishna, mangala

Location : doc_vishhnu

Transliterated by : Aruna Narayanan

Proofread by : Aruna Narayanan

Latest update : August 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 15, 2022

*sanskritdocuments.org*

# શ્રીકૃષ્ણમઙ્ગલમ્

મઙ્ગલં યાદવેન્દ્રાય મહનીયગુણાબ્ધયે । (મહનીયગુણાત્મને) ।
વસુદેવતનૂજાય વાસુદેવાય મઙ્ગલમ્ ॥ ૧॥

કિરીટકુણ્ડલભ્રાજદલકૈર્યન્મુખશ્રિયે ।
શ્રીવત્સકૌસ્તુભોદ્ભાસિ વક્ષસે ચાસ્તુ મઙ્ગલમ્ ॥ ૨॥

નીલામ્બુદનિકાશાય વિદ્યુત્સદૃશવાસસે ।
દેવકીવસુદેવાભ્યાં સંસ્તુતાયાસ્તુ મઙ્ગલમ્ ॥ ૩॥

તાભ્યાં સમ્પ્રાર્થિતાયાથ પ્રાકૃતાર્ભકરૂપિણે ।
યશોદાય ગૃહં પિત્રા પ્રાપિતાયાસ્તુ મઙ્ગલમ્ ॥ ૪॥

પૂતનાऽસુપયઃપાનપેશલાયાऽસુરારિણે ।
શકટાસુર વિધ્વંસિ પાદપદ્માય મઙ્ગલમ્ ॥ ૫॥

યશોદાऽऽલોકિતે સ્વાસ્યે વિશ્વરૂપપ્રદર્શિને ।
માયામાનુષરૂપાય માધવાયાસ્તુ મઙ્ગલમ્ ॥ ૬॥

તૃણાવર્તદનૂજાસુ હારિણે શુભકારિણે ।
વત્સાસુરપ્રભેત્રે ચ વત્સપાલાય મઙ્ગલમ્ ॥ ૭॥

દામોદરાય વીરાય યમલાર્જુનપાતિને ।
ધાત્રા હૃતાનાં વત્સાનાં રૂપધર્ત્રેऽસ્તુ મઙ્ગલમ્ ॥ ૮॥

બ્રહ્મસ્તુતાય કૃષ્ણાય કાલીયફણનૃત્યતે ।
દાવાગ્નિરક્ષિતાશેષ ગોગોપાલાય મઙ્ગલમ્ ॥ ૯॥

ગોવર્ધનાચલોદ્ધર્ત્રે ગોપી ક્રીડાભિલાષિણે ।
અઞ્જલ્યાऽऽહૃતવસ્ત્રાણાં સુપ્રીતાયાસ્તુ મઙ્ગલમ્ ॥ ૧૦॥

સુદર્શનાખ્ય ગન્ધર્વ શાપમોક્ષણકારિણે ।
શઙ્ખચૂડશિરોહર્ત્રે વૃષભઘ્નાય મઙ્ગલમ્ ॥ ૧૧॥

ગાન્દિનીસુતસન્દૃષ્ટ દિવ્યરૂપાય શૌરિણે ।
ત્રિવક્રયા પ્રાર્થિતાય સુન્દરાઙ્ગાય મઙ્ગલમ્ ॥ ૧૨॥

ગન્ધમાલ્યામ્બરાઢ્યાય ગજરાજવિમર્દિને ।
ચાણૂરમુષ્ટિકપ્રાણહારિણે ચાસ્તુ મઙ્ગલમ્ ॥ ૧૩॥

કંસહન્ત્રે જરાસન્ધબલમર્દન કારિણે ।
મથુરાપુરવાસાય મહાધીરાય મઙ્ગલમ્ ॥ ૧૪॥

મુચુકુન્દ મહાનન્દદાયિને પરમાત્મને ।
રુક્મિણી પરિણેત્રે ચ સબલાયાસ્તુ મઙ્ગલમ્ ॥ ૧૫॥

દ્વારકાપુરવાસાય હારનૂપુરધારિણે ।
સત્યભામાસમેતાય નરકઘ્નાય મઙ્ગલમ્ ॥ ૧૬॥

બાણાસુરકરચ્છેત્રે ભૂતનાથસ્તુતાય ચ ।
ધર્માહૂતાય યાગાર્થં શર્મદાયાસ્તુ મઙ્ગલમ્ ॥ ૧૭॥

કારયિત્રે જરાસન્ધવધં ભીમેન રાજભિઃ ।
મુક્તૈઃ સ્તુતાય તત્પુત્ર રાજ્યદાયાસ્તુ મઙ્ગલમ્ ॥ ૧૮॥

ચૈદ્યતેજોપહર્ત્રે ચ પાણ્ડવપ્રિયકારિણે ।
કુચેલાય મહાભાગ્યદાયિને તેઽસ્તુ મઙ્ગલમ્ ॥ ૧૯॥

દેવ્યષ્ટક સમેતાય પુત્રપૌત્રયુતાય ચ ।
ષોડશસ્ત્રી સહસ્રૈસ્તુ સંયુતાયાસ્તુ મઙ્ગલમ્ ॥ ૨૦॥

યશ્શિષ્ટરક્ષણપરઃ કરુણામ્બુરાશિઃ
    દુષ્ટાસુરાંશનૃપતીન્ વિનિગૃહ્ય શૂરાન્ ।
કષ્ટાં દશાં અપનુદન્તરસા પૃથિવ્યાઃ
    પુષ્ટિં દદાતુ સ હરિઃ કુલદૈવતં નઃ ॥ ૨૧॥

॥ ઇતિ શ્રીકૃષ્ણમઙ્ગલં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Aruna Narayanan

*Shri Krishnamangalam*

pdf was typeset on August 15, 2022

Please send corrections to *sanskrit@cheerful.com*